अनुक्रमांकः ..................................

निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MAS 205**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2018**

## एम.ए. संस्कृतम्, (सत्रम् : द्वितीयम्)

## धर्मशास्त्रम् अर्थशास्त्र च

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

### खण्ड–क

### (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. मनुरीत्या धर्मस्य परिभाषां लिखन्तु।
2. मनुस्मृतिरीत्या कति दुर्गाणि?, कानि कानि च भवन्ति? तेषु च कतमं विशिष्टं दुर्गं मन्यते?
3. याज्ञवल्क्यस्मृतौ दुष्टसाक्षिणः किं लक्षणमुच्यते?
4. कौटिलीयार्थशास्त्ररीत्या दण्डनीतेः लाभान् ज्ञापयन्तु अपि च कामक्रोधादिशत्रून् जेतुं के लाभाः काः च हानयो भवन्तीति ज्ञापयन्तु।
5. चाणक्यमते कतिधा गूढपुरुषा भवन्ति के विशिष्टाश्च ते भवन्ति?

### खण्ड–ख

### (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे प्रदत्तानां निर्देशानामनुसारेण प्रश्नाः समाधेयाः।

निम्नलिखितेषु श्लोकेषु चतुर्णां श्लोकानां सप्रसंगं व्याख्या करणीया – **(4×5=20)**

1. सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।
   वेदशब्देभ्य एवाऽऽदौ पृथक्संस्थाश्च निर्ममे।।
2. इन्द्रियाणां विचरतां विषयेष्वपहारिषु।
   संयमे यत्नमातिष्ठेद्विद्वान्यन्तेव वाजिनाम्।।
3. व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते।
   व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः।।

4. हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्।
   ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्।।
5. द्वैधे बहूनां वचनं समेषु गुणिनां तथा।
   गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तमाः।।
6. विद्याविनीतो राजा हि प्रजानां विनये रतः।
   अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रते।।

## खण्ड–ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः *'ग'*** खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

1. स्वेदजजीवाः के के भवन्ति?
2. मनुस्मृतौ कति संस्काराः मन्यन्ते?
3. मनुस्मृतौ ब्राह्मणाय कस्य काष्ठस्य दण्डविधानं विधीयते?
4. याज्ञवल्क्यस्मृतिरीत्या अर्थधर्मशास्त्रयोः कः वलवान्निति?
5. 'योऽभियुक्तः परेतः स्यात्तस्य रिक्थो तमुद्धरेत्' वचनमिदं कुत्रत्यमस्ति?
6. 'व्यवहाराध्यायः' कस्यां स्मृतौ वर्तते?
7. मनुस्मृतेः मुख्यो रचयिता को वर्तते?
8. अर्थशास्त्रस्य प्रणेता को वर्तते?
9. 'स्वधर्मं संदधानो हि प्रेत्य चेह च नन्दति' वचनमिदं कस्मिन् ग्रन्थे वर्णितम्?
10. अर्थशास्त्रस्य प्रथमाधिकरणस्य किं नाम?

--------------x--------------